# याज्ञवल्क्यकृत सरस्वती स्तवं

कृपां कुरु जगन्मातर् मामेवं हत तेजसं
गुरुशापात् स्मृतिभ्रष्टं विद्याहीनं च दुःखितं

ज्ञानं देहि स्मृतिं विद्यां शक्तिं शिष्य प्रबोधिनीं
ग्रंथकर्तृत्व शक्तिं च सुशिष्यं सुप्रतिष्ठितं

प्रतिभां सत्सभायां च विचारक्षमतां शुभां
लुप्तं सर्वं दैवयोगान्नवीभूतं पुनः कुरु

यथांकुरं भस्मनि च करोति देवता पुनः
ब्रह्मस्वरूपा परमा ज्योतीरूपा सनातनी

सर्वविद्याधिदेवी या तस्यै वाण्यै नमोनमः
विसर्ग बिंदु मात्रासु यदधिष्ठानमेव च

तदधिष्ठात्री या देवी तस्यै वाण्यै नमोनमः
व्याख्यास्वरूपा सा देवी व्याख्याधिष्ठातृ रूपिणी

यया विना प्रसंख्यावान् संख्यां कर्तुं न शक्यते
कालसंख्या स्वरूपा या तस्यै देव्यै नमोनमः

भ्रमसिद्धांतरूपा या तस्यै देव्यै नमोनमः
स्मृतिशक्ति ज्ञानशक्ति बुद्धिशक्ति स्वरूपिणी

प्रतिभा कल्पनाशक्तिर् या च तस्यै नमोनमः
सनत्कुमारो ब्रह्माणं ज्ञानं पप्रच्छ यत्रवै

बभूव मूकवत्सोपि सिद्धांतं कर्तुमक्षमः
तदा जगाम भगवानात्मा श्री कृष्ण ईश्वरः

उवाच स च तां स्तौहि वाणीमिष्टां प्रजापते
स च तुष्टाव तां ब्रह्मा चाज्ञया परमात्मनः

चकार तत्प्रसादेन तदा सिद्धांतमुत्तमं
यदाप्यनंतं पप्रच्छ ज्ञानमेकं वसुंधरा

बभूव मूकवत्सोपि सिद्धांतं कर्तुमक्षमः
तदा तां च स तुष्टाव संत्रस्तः कश्यपाज्ञया

ततश्चकार सिद्धांतं निर्मलं भ्रमभंजनं
व्यासः पुराण सूत्रं च पप्रच्छ वाल्मीकिं यदा

मौनीभूतश्च सस्मार तामेव जगदंबिकां
तदा चकार सिद्धांतं तद्वरेण मुनीश्वरः

संप्राप्य निर्मलं ज्ञानं भ्रमांध्यध्वंस दीपकं
पुराण सूत्रं श्रुत्वाच व्यासः कृष्ण कलोद्भवः

तां शिवां वेद दध्यौ च शतवर्षं च पुष्करे
तदा त्वत्तो वरं प्राप्य सत्कवींद्रो बभूव ह

तदा वेदविभागं च पुराणं च चकार सः
तदा महेंद्रः पप्रच्छ तत्वज्ञानं सदाशिवं

क्षणं तामेव संचिंत्य तस्यै ज्ञानं ददौ विभुः
पप्रच्छ शब्दशास्त्रं च महेंद्रश्च बृहस्पतिं

दिव्यवर्ष सहस्रंच सत्वां दध्यौ च पुष्करे
तदा त्वत्तो वरं प्राप्य दिव्यवर्ष सहस्रकं

उवाच शब्दशास्त्रं च तदर्थं च सुरेश्वरं
अध्यापिताश्च ये शिष्यायैरधीतं मुनीश्वरैः

ते च तां परिसंचिंत्य प्रवर्तंते सुरेश्वरीं
त्वां संस्तुता पूजिता च मुनींद्रैर्मनु मानवैः

दैत्येंद्रैश्च सुरैश्चापि ब्रह्म विष्णु शिवादिभिः
जडीभूतस्सहस्रास्यः पंचवक्त्रश्चतुर्मुखः

यां स्तोतुं किमहं स्तौमि तामेकास्येन मानवः
इत्युक्त्वा याज्ञवल्क्यश्च भक्तिनम्रात्म कंधरः

प्रणनाम निराहारो रुरोदच मुहुर्मुहुः
ज्योतीरूपा महामाया तेन दृष्टाप्युवाच तं

सुकवींद्रो भवेत्युक्त्वा वैकुंठं च जगाम ह
याज्ञवल्क्यकृतं वाणीस्तोत्रमेतत्तु यः पठेत्

सुकवींद्रो महावाग्मी बृहस्पति समो भवेत्
महामूर्खश्च दुर्बुद्धिर्वर्षमेतत्तु यः पठेत्
स पंडितश्च मेधावी सुकवींद्रो भवेद्ध्रुवं